# Sarasvati Stotram

# सरस्वतीस्तोत्रम्

## Document Information

Text title : Sarasvati Stotram

File name : sarasvatIstotram.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, sarasvatI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# सरस्वतीस्तोत्रम्

जुषस्व बालवाक्यवत्स्तवं ममाम्ब भारती ।
असत्सदप्यदस्त्वयि भ्रमाद्विभाति केवले ॥ १॥

क्षराक्षरात्परं हि यत्त्वमेव तत्पदं ध्रुवम् ।
जले यथोर्मिबुद्बुदास्तथा त्वयीशजीवदृक् ॥ २॥

त्र्यधीश ओङ्कृतेऽखिलं त्वमेव चास्य मङ्गलम् ।
यदर्धमात्रमूर्जितं क्रियाविकारवर्जितम् ॥ ३॥

त्रिसप्तयागसाधिके सुभुक्तिमुक्तिदायके ।
स्वरार्णकारणे स्तवः स्वयं नु कैः कृतस्तव ॥ ४॥

प्रकाशकप्रकाशके श्रुतिश्रुतादिधारके ।
त्वमेव सर्वकारणं त्वमेव सर्वतारणम् ॥ ५॥

सुशक्तभक्तभावितं हि तेन सर्वथा ततम् ।
तदेव धाम ते वरं यदीक्ष्यते बुधैः परम् ॥ ६॥

स्थिराश्चराश्च गोचराः परत्र चात्र वाऽम्ब ये ।
त्वदेव तत्समागमः प्रमाणमत्र चागमः ॥ ७॥

नमोऽस्तु ते सरस्वति ध्यवित्रि वाजिनीवति ।
प्रसीद बुद्धिचेतने स्वभक्तहृन्निकेतने ॥ ८॥

स्तुतैवं विष्णुजिह्वा सा प्रसन्ना सूनृतेरका ।
प्राहाविष्कृत चात्मानं तुष्टास्मि वरयेप्सितम् ॥ ९॥

सकम्बलस्य कुरु मे सहायं शम्भुगायने ।
सुस्वरत्वादि यच्छेति ययाचेऽहिः सरस्वतीम् ॥ १०॥

वागीशाहोभयोरस्तु दिव्यनादरहस्यमित् ।
स्तोत्रं चास्तु स्खलद्वीष्ट्वधीजाड्यादिहरं त्विदम् ॥ ११॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं सरस्वतीस्तोत्रं सम्पूर्णम् ।

*Sarasvati Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*